श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटशेषार्यानुगृहीता

# ॥ श्रीकोदण्डपाणिकरुणास्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to revered U. Ve. Sri. V. S. Karunakarachar Swami and Sri. Ananthanarayana of Chennai for their help in the preparation of this document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकोदण्डपाणिकरुणास्तुतिः ॥

वन्दे वेङ्कटशेषार्यं वत्सवंशशिरोमणिम्।
वात्स्यश्रीवरदाचार्यतनयं करुणानिधिम्॥

श्रीदंभभाजां परिहर्तुमीक्षां पादं हरेस्संश्रयितुं सदैव।
भीदं भवं द्रावयितुं जवेन कोदण्डपाणेः करुणां नतोस्मि॥ १ ॥

रघुवरकरुणे! करुणा तव यदि पुरतस्तदा किमस्त्यर्थ्यम्?।
प्रभुरपि जगतां महितः स तु भवति नुतो भवत्पदत्वेन॥ २ ॥

नेदं जगत् हरिरवेत् न च तं स्वयं सः
श्रीदं पदं भवति नो भविनां च तस्य।
मोदं परं कथमुपैतु जनः च सर्वः
कोदण्डपाणिकरुणे! करुणां विना ते॥ ३ ॥

अहो मे सम्मोहो भवति सति लब्धोदयदयेपि-
उदारे श्रीदारे कृपणमिह कञ्चित् श्रितवतः।
य एष स्वप्रीत्यै निहितमपि मिथ्यास्तववचः
तथा तथ्यं मत्वा न गणयति कञ्चित् परमपि॥ ४ ॥

भ्रान्तः श्रान्तस्तथाहं कृपणमुखसुखालोकलिप्सुस्तदीया-
वासाभासे वसन्तन्मुदमुदययितुं तत्र चित्राण्यवोचम्।
मन्दो मन्दामृतार्द्रीभवदनघदयापाङ्गसङ्गादृतस्त्वम्
मुक्त्वा मुग्धं मुखं ते मुदमपि सदनं रामचन्द्र! क्षमस्व॥ ५ ॥

सायं प्रातः तव मुखकमलास्वादनं कर्म नित्यम्
त्यक्त्वा सेवां तवाङ्घ्र्योरपि निखिलफलापादिनीं रामचन्द्र!।

www.prapatti.com

मुग्धः कश्चित् श्रितोहं विभुरिति कृतधीः तस्य संपत्तिवृद्धिम्
वाञ्छन् अञ्चन् सदा तत् सदनमपि तथाह्यञ्चितो वञ्चितोस्मि॥ ६ ॥

सुधामनि सुधामनि क्षपितदुर्गते सद्गते
किमत्र भवति स्थिते प्रभुवरेऽत्युदारे परम्।
नरं श्रयितुमाश्रयन्नहमहो महामोहतः
परं यदि तवोदयो मयि तदा दयेथा इति॥ ७ ॥

आदावाश्रित्य कृच्छ्रात् कथमपि समयं प्राप्य चोक्ते निजार्थे
पश्चात् पश्चात् भवत्वित्युपजनितदराशे स्थिराशे धरेशे।
नालं ह्यायो व्ययायाश्रित इह बहुलः कालमीक्षस्व कञ्चित्
कष्टं स्पष्टं वृथेथ्यं वदति जनयसि प्रार्थनां रामचन्द्र !॥ ८ ॥

अन्यादृक्षमदीयदिव्यसुषमासेवाक्रियाद्यक्षणे
प्रध्वस्ताखिलकल्मषे नतजने पाश्चात्यसेवाफलम्।
किं कुर्यामिति चिन्तये स तु ममाजानन् मनो याचते
निश्शेषाघहतिं मुहुर्मुहुरिति स्मेरोऽसि सीतापते !॥ ९ ॥

॥ इति श्रीकोदण्डपाणिकरुणास्तुतिः संपूर्णा ॥



www.prapatti.com